**शिक्षा निदेशालय, राष्ट्रीय राजधानी क्षेत्र, दिल्ली**

**।।अभ्यासप्रश्न- पत्रम्।।**

**(2023-24)**

**संस्कृतम्**

**कक्षा -नवमी**

**समयः-होरात्रयम्**

**अंका:-80**

**निर्देशाः-**

**१ . अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति ।**

खण्ड: (क) अपठितावबोधनम् – 10 अङ्का:

खण्ड: (ख) रचनात्मक – कार्यम् - 15 अङ्का:

खण्ड: (ग) अनुप्रयुक्त- व्याकरणम् – 25 अङ्का:

खण्ड: (घ) पठितावबोधनम् - 30 अङ्का:

२ . प्रत्येकम् खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।

३ . प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीयानि ।

४ . सर्वेषाम् प्रश्नानाम् उत्तराणि संस्कृते लेखनीयानि ।

५. प्रश्नानां निर्देशा: ध्यानेन पठनीया:।

**खण्डः – क**

**अपठितांश-अवबोधनम् (10 अङ्का: )**

**1 . अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत ।**

पुरा कस्मिंश्चित् नगरे मायादास : नाम नृपः आसीत् । सः प्रभूतं वैभवं धारयति स्म । विपुलं मित्रमण्डलं , विशालम् सैन्यबलम् आज्ञाकारिणः मन्त्रिणः , सुखभाजः प्रजाजना : सुन्दराणि भवनानि , प्रिया भार्या एका दशवर्षीया तनया च कि नासीत् तस्य पार्श्वे , किन्तु यथा - यथा तस्य वैभवं वर्धते स्म , तथा तथा तस्य धनतृष्णा अपि वर्धते स्म । विशेषतः सुवर्णसंचयने तस्य महती प्रीतिः अभवत् । तस्य इच्छा आसीत् यत् सर्वं सुवर्णमयं स्यात् एकदा रात्रौ ईदृशेषु विचारेषु मग्नः सः निद्रावशं जगाम सहसा तस्य शयन - कक्षः पूर्वेण आलोकेन दीप्तः अभवत् । सः सम्भ्रमेण निद्रां त्यक्त्वा उपविष्ट एका देवी तं ब्रूते स्म " भो मायादास । अहं लक्ष्मीः तव आराधनेन प्रार्थनया च प्रसन्नाऽस्मि वरं वृणीष्व । "

**अ. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)** 1 X 2=2

(i)नृपस्य कीदृशी भार्या आसीत् ?

(ii)नृपः कः आसीत् ?

(iii)कः प्रभूतं वैभवं धारयति स्म ?

**ब. पूर्णवाक्येन उत्तरत –(केवलं प्रश्नद्वयम्)** 2x2=4

(i) लक्ष्मी : मायादासं किम् अवदत् ?

(ii) धनी नृपस्य का इच्छा आसीत् ?

(iii) नृपस्य पार्श्वे किं किमासीत् ?

**स. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।** **1x1=1**

**द. यथानिर्देशम् उत्तरत-(केवलं प्रश्नत्रयम् )** 1×3=3

(i) ' प्रकाशेन ' इत्यर्थे कः शब्दः अत्र प्रयुक्त ?

(क)आलोकेन (ख)विपुलं (ग)प्रीतिः (घ)नृपः

(ii)' प्रीतिः ' इति पदस्य किं विशेषणपदम् अत्र प्रयुक्त ?

(क) त्यक्त्वा(ख) साकाशे ( ग) महती (घ) सुवर्णमय:

(iii)'उपविष्ट ' इति पदस्य किं कर्तृपदं प्रयुक्तम् ?

(क) निद्रां (ख)त्यक्त्वा (ग)सः ( घ) सम्भ्रमेण

(iv)' विहाय ' इति पदस्य किं पर्यायपदम् अत्र प्रयुक्तम् ?

(क) पार्श्वे (ख ) प्रभूतं ( ग) त्यक्त्वा (घ)उपविष्ट

## खण्ड – (ख)

## रचनात्मककार्यम् (15 अङ्का:)

**2. भवत: नाम वशिष्ठ: अस्ति । भवान् नवमी कक्षायां पठति । भवान् प्रथमसत्रपरीक्षायाम् उत्तमाङ्कान् प्राप्तवान् इति वर्णयन् मित्रं प्रति पत्रं लिखतु।** **5×1=5**

**3.अध: प्रदत्तं चित्रं दृष्ट्वा मंजूषायां प्रदत्तशब्दानां सहाय्येन पञ्च वाक्यानि संस्कृते लिखत ।** 1×5=5



**मञ्जूषा**

| |
|---|
| प्रदर्शनकक्षः, अध्यापकः, ध्वनिप्रसारयंत्रम्, छात्रः,छात्राः, अवधानेन, प्रदर्शनपट्टः, "स्मार्टक्लास", पाठनम्, व्याख्यानम् |

अथवा

**मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः लिखत ।**

## जन्मदिवससमारोहः

**मञ्जूषा**

| |
|---|
| जन्मदिवसस्य, समारोह, बालकः, केककर्तनम्, प्रसन्नाः, केकपदार्थम्, खादयति, महोत्सवम, वर्षे एकवारम् |

**4.अधोलिखितानां वाक्यानां संस्कृतेन अनुवादं कुरुत ।** **1×5=5**

**( केवलं वाक्यपञ्चकम् )**

(i)मैं बाजार जाता हूँ । I go to the Market .

(ii)बालक बन्दर से डरता है । The child is afraid of the Monkey

(iii)वह हमारा मित्र है ।He is our friend

(iv)परिश्रम से सफलता मिलती है ।Success comes from Hard Work

(v)हम सब संस्कृत पढ़ते है । We all study Sanskrit

(vi)देव गाने में कुशल है । Dev is skilled in singing

**खण्ड – (ग)**

**अनुप्रयुक्त व्याकरणम् (25 अङ्काः)**

**5. अधोलिखितानां पदानां सन्धिपदं/ सन्धिच्छेदं वा कुरुत ।** **( केवलं प्रश्नचतुष्टयम् )**

1 x 4 = 4

(I) श्रेष्ठी + आह

(II) द्वौ + अपि

(III) पुरुषोपार्जिता

(IV) यथेच्छया

(V) स्नान + अर्थम् + उपकरणम्

**6 .यथानिर्देशम् उचितं विभक्तिं प्रयुज्य रिक्तस्थान -पूर्तिं कुरुत -(केवलं प्रश्नचतुष्टयम् )**

**1x4=4**

(i)अग्नि : ............न दहति ।

( क) आत्मा (ख)आत्मने (ग)आत्मना (घ)आत्मानम्

(ii)राजधर्मेण विहीन : ........... नश्यति।

(क ) राजा (ख)राजानम् (ग)राज्ञः (घ)राज्ञा

(iii)मनसि वाचि क्रियायां च............ समानता भवति

(क ) विद्वांसः (ख)विदुषाम् (ग)विद्वद्भ्यः (घ) विद्वद्भिः

(iv) ................ सज्जनानाम् आदरं कुर्वन्ति ।

(क)भवत्सु (ख)भवान (ग)भवन्तः (घ)भवद्भयः

(v)...........बालकेन उच्चैः हस्यते ।

(क) गच्छता (ख)गच्छदभिः (ग)गच्छतः (घ)गच्छन्तम्

**7. उचितलकारं प्रयुज्य ( क्रियापदं ) चित्वा वाक्यानि पूरयत - (केवलं प्रश्नचतुष्टयम् )**
**1x4=4**

(i)राधा बालं गृहं......................।

(अ) नयति(ख) नयेताम् (स) नयसि(घ) नयः

(ii)वयं मिलित्वा प्रश्नं................................।

(अ) पृच्छतु(ख) पृच्छ(स) पृच्छाम(द) पृच्छन्तु

(iii)त्वं पुस्तकं..........।

(क) पठसि(ख) पठाम(स) पठति(घ) पठन्ति

(iv)अम्बा स्वादिष्टं भोजनं.....।

(अ) पचेत्(ब) पचेताम्(ग) पचेः(द) पचेयुः

(v) अहं वेदान्............।

(अ) जानाति (ख) जानामि (स) जानन्तु (द) जानासि

**8. कारकोपपदविभक्तिम् आश्रित्य उचितपदानि विकल्पेभ्यः चिनुत (केवलं प्रश्नचतुष्टयम् )**
**1x4=4**

(i)बालैः............न प्रमदितव्यम्

(अ) सत्यात् (ब) सत्यम् (स) सत्ये (द) सत्येन

(ii)परिश्रमी मनुष्यः...........एव विश्वसिति ।

(अ) कर्मणः(ख) कर्म(स) कर्मणि(द) कर्मणे

(iii)..............किं प्रयोजनम् ?

(अ) मूर्खपुत्रस्य(ख) मूर्खपुत्रेण(स) मूर्खपुत्रात्(द) मूर्खपुत्रम्

(iv)...............निकषा एकः देवालयः शोभते ।

(अ) विद्यालयम् (ब) विद्यालयस्य (स) विद्यालयात् (द) विद्यालयः

(v)रामः...........अलम् ।

(अ) शत्रुभिः (ख) शत्रून् (स) शत्रूणाम् (द) शत्रुभ्यः

**9.रेखांकितपदेषु प्रकृतिः प्रत्ययं विभज्य/ संयोज्य वा लिखत (केवलं प्रश्नत्रयम् ). 1x3=3**

(i) बुद्धिमती ***<u>विहस्य</u>*** अवदत्।

(क) वि+हस्य (ख) विहसन् + ल्यप् (ग) वि+हस्+ल्यप् (घ) विहस्+ल्यप्

(ii) पठनं **<u>कृ+क्त्वा</u>** भोजनं कुर्यात्।

(क) कृतित्व(ख) कृत्वा(ग)  करित्वा(घ) कृत्तवा

(iii) लता **<u>पठितुं</u>** विद्यालयं गच्छति।

(क) पठ् + तुमुन्(ख) पठि+तुमुन्(ग) पठ+तुम्(घ) पठन् + तुमुन्

(iv) त्वं कुत्र **<u>गत्वा</u>** क्रीडसि?

(क) ग+क्त्वा (ख) गम्+वत्वा (ग) गम्+क्त्वा (घ) ग+त्वा

**10. अङ्कानां स्थाने उचितसंख्यापदानि लिखत -     (केवलं प्रश्नचतुष्टयम् )            1/2x4=2**

(i) वेदाः................ (4) सन्ति ।

(ii) पुराणानि ............(18) सन्ति ।

(iii) रामायणे .............(7)काण्डाः वर्तन्ते ।

(iv) भासस्य.............. (13) नाटकानि ।

(v) वर्षे..................... (12) मासाः भवन्ति

**11.अधोलिखितपदेषु उपसर्ग संयोज्य/विभज्य वा लिखत    (केवलं प्रश्नचतुष्टयम् )      1/2x4=2**

1. निरगच्छत्
2. निस्सारतु
3. प्रत्यवदत्
4. वि+शिष्यते
5. अनु+करोति

**12. कोष्टकेभ्य: शुद्धम् अव्ययपदं चित्वा रिक्तस्थानं पूरयत् -      (केवलं प्रश्नचतुष्टयम् )      1/2x4=2**

(i) यत्र नार्यस्तु पूज्यन्ते रमन्ते......... देवता। (तत्र/शनैः)

(ii) यदा मेघाः गर्जन्ति ..........वृष्टिः भवति। (वृथा/तदा)

(iii) सोमवासरः ..........भविष्यति। (ह्यः /श्वः)

(iv).......... क्रियां न विदधीत। (सहसा/अधुना)

(v) कोलाहलं ...........कुरु। (नूनम्/मा)

**खण्ड -घ**

**पठितावबोधनम् (30अङ्का: )**

**13. अधोलिखितं गद्यांशं पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**

पुरा कस्मिंश्चित् ग्रामे एका निर्धना वृद्धा स्त्री न्यवसत्। तस्याः च एका दुहिता विनम्रा मनोहरा चासीत्। एकदा माता स्थाल्यां तण्डुलान् निक्षिप्य पुत्रीम् आदिशत्। "सूर्यातपे तण्डुलान् खगेभ्यो रक्ष।" किञ्चित् कालादनन्तरम् एको विचित्रः काकः समुड्डीय तस्याः समीपम् अगच्छत्।

**अ .एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)** 1/2X 2=1

(i)वृद्धा स्त्री कीदृशी आसीत्?

(ii)निर्धनास्त्री कुत्र न्यवसत्?

(iii)वृद्धायाः कीदृशी दुहिता आसीत्?

**ब. पूर्णवाक्येन उत्तरत –(केवलं प्रश्नद्वयम्)** 2x1=2

(i) किञ्चित्कालानन्तरम् किम् अभवत् ?

(ii) दुहिता कीदृशी आसीत्?

(iii)वृद्धा पुत्रीं किम् आदिशत्।

**स. यथानिर्देशम् उत्तरत-(केवलं प्रश्नद्वयम् )** 1x2=2

(i)अनुच्छेदे 'न्यवसत्' इति क्रियापदस्य कर्तृपदं किमस्ति ?

(ii) 'दुहिता विनम्रा' अनयोः पदयोः विशेषणपदं किम्?

(iii)अस्मिन् अनुच्छेदे 'धनवती' इति पदस्य कः विपर्ययः आगतोऽस्ति?

14. **अधोलिखितं पद्यांशं पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**

**आरम्भगुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमती च पश्चात् ।**

**दिनस्य पूर्वार्द्धपरार्द्धभिन्ना छायेव मैत्री खलसज्जनानाम् ।।**

**अ.एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)** 1/2 X 2=1

(i) केषाम् मैत्री आरम्भगुर्वी भवति?

(ii) केषाम् मैत्री पश्चात् वृद्धिमती भवति?

(iii) खलसज्जनानाम् मैत्री कीदृशी भवति ?

**ब. पूर्णवाक्येन उत्तरत –(केवलं प्रश्नद्वयम्)** 1x2=2

(i) दिनस्य पूर्वार्द्धच्छायेव केषाम् मैत्री भवति ?

(ii) दिनस्य अपरार्द्धच्छायेव केषाम् मैत्री भवति?

(iii) सज्जनानाम् मैत्री कीदृशी भवति ?

**स.यथानिर्देशम् उत्तरत-(केवलं प्रश्नद्वयम् )** 1x2=2

(i) श्लोके 'लघ्वी' इति पदस्य विपर्ययपदं किं प्रयुक्तम् ?

(ii) अत्र 'भवति' इति क्रिया पदस्य कर्त्ता कः?

(iii) 'सज्जनानाम्' इति पदस्य विपर्ययपदं किम्

**15. संवादान् पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि संस्कृतेन लिखत**

चन्दनः - (प्रसन्नो भूत्वा, अङ्गुलिषु गणयन्) अहो! सेटक-त्रिशतकानि पयांसि ! अनेन तु बहुधनं लप्स्ये। (नन्दिनीं दृष्ट्वा ) भो नन्दिनि ! तव कृपया तु अहं धनिकः भविष्यामि। (प्रसन्नः सः धेनोः बहुसेवां करोति)

चन्दनः - ( चिन्तयति) मासान्ते एव दुग्धस्य आवश्यकता भवति I यदि प्रतिदिनं दोहनं करोमि तर्हि दुग्धं सुरक्षितं न तिष्ठति I इदानीं किं करवाणि? भवतु नाम मासान्ते एव सम्पूर्णतया दुग्धदोहनं करोमि I ( एवं क्रमेण सप्तदिनानि व्यतीतानि I सप्ताहान्ते मल्लिका प्रत्यागच्छति )

मल्लिका - (प्रविश्य) स्वामिन् ! प्रत्यागता अहम् I आस्वादय प्रसादम्।

(चन्दनः मोदकानि खादति वदति च)

चन्दनः - मल्लिके! तव यात्रा तु सम्यक् सफला जाता? काशीविश्वनाथस्य कृपया प्रियं निवेदयामि।

मल्लिका(साश्चर्यम्) एवम्। धर्मयात्रातिरिक्तं प्रियतरं किम्?

**अ.एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)** 1/2x 2=1

(i) मासान्ते कस्य आवश्यकता भवति?

(ii) एवं क्रमेण कानि व्यतीतानि?

(iii) चन्दनः कस्याः बहुसेवां करोति?

**ब. पूर्णवाक्येन उत्तरत –(केवलं प्रश्नद्वयम्)** 1x2=2

(i) कस्याः कृपया तु चन्दनः धनिको भविष्यति ?

(ii) दुग्धं कदां सुरक्षितं न भविष्यति?

(iii)मल्लिका साश्चर्यं किम् अवदत्?

**स. यथानिर्देशम् उत्तरत-(केवलं प्रश्नद्वयम्)** 1x2=2

(i) 'तव कृपया तु अहं धनिकः भविष्यामि।' अत्र विशेषणपदं किम्?

(ii) संवादे 'गोः' इति पदस्य कः पर्यायः आगतः?

(iii) 'निस्सृत्य' इति पदस्य विपर्ययपदं किम् आगतम् अस्ति ?

**16. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरूत -** 1x4=4

(i) मधुरवचने **दरिद्रता** न भवति।

(ii) रामः **मकरालये** सेतुं बबन्ध।

(iii) आत्मनः प्रतिकूलानि **परेषां** न समाचरेत्।

(iv) **विद्याहीनः** नरः सभायाम् न शोभते।

(v) **प्रियवाक्यप्रदानेन** सर्वे तुष्यन्ति जन्तवः।

**17.मञ्जूषापदसहायतया समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयत –**
1X3=3

**विना लिप्यक्षरज्ञानं तपोभिरेव केवलम् ।**

**यदि विद्या वशे स्युस्ते, सेतुरेष तथा मम् ॥**

अन्वयः- लिपि (i)..........ज्ञानं विना केवलं (ii)...........एव यदि ते विद्या (iii).........स्युः तथा मम एष सेतुः (अपि स्युः)।

मञ्जूषा –

| |
|---|
| तपोभिः, वशे, अक्षर |

अथवा

**श्लोकस्य भावार्थं मञ्जूषापदसहायतया पूरयित्वा लिखत**

**निवर्तय मतिं नीचां परदाराभिमर्शनात्।**

**न तत्समाचरेद्वीरो यत्परोऽस्य विगर्हयेत्।।**

भावार्थ - हे विद्वान् रावण! त्वं परेषां स्त्रीहरणं रूपं पापात्  स्व दुर्मतिं निवर्तय यतः(i) ...........जनाः तादृशाणि कर्माणि न (ii)............यानि अन्यः जनः (iii)...... करोति ।

मञ्जूषा -

| |
|---|
| अपकीर्तिम्, कुर्युः, धैर्यवन्तः |

**18. अधोलिखित-कथाशं समुचित -क्रमेण लिखत-** 1/2x8=4

(i) तस्मै ज्ञानदातुम् इन्द्रः वेशं परिवर्त्य तस्य समीपम् अगच्छत्।

(ii) इदं श्रुत्वा तपोदत्तः विद्यां प्राप्तुं गुरुकुलम् अगच्छत्।

(iii) तदातपोदत्तः इदं दृष्ट्वा तस्य उपहासं करोति ।

(iv) एकः तपोदत्तः तपस्यारतः बालकः आसीत्।

(v) सः कथयति-भोः! कथमेतत् व्यर्थमेव सिक्ताभिः सेतुनिर्माणं करोषि ।

(vi) सः पुरुषः गंगायाः सिक्ताभिः सेतुनिर्माणम् आरभत।

( vii) सः विद्याप्राप्त्यै अध्ययनं न कृत्वा केवलं तपः एव अकरोत्।

(viii) इन्द्रः अवदत् यदि तपसा एव त्वं विद्यां प्राप्स्यसि तर्हि अहमपि सिक्ताभिः सेतुनिर्माणं करिष्यामि।

**19.(क) रेखांकितपदानि आधृत्य प्रसंगानुसारम् अर्थचयनं चित्वा लिखत – 1/2x4=2**

(i) **<u>कलिन्दात्मजायाः</u>** तीरे समीरः वहति ।

(क) यमुनायाः (ख) गङ्गः (ग) नर्मदायाः (घ) सरस्वत्याः

(ii) नदीनाम् कान्तं **<u>सलिलं</u>** सलीलम् उच्छलेत्।

(क) जलम् (ख) मृत्तिका (ग) लीलम् (घ) वायोः

(iii) सखिभिः सह धर्मयात्रया **<u>आनन्दिता</u>** च भव।

(क) विकलांगता (ख) प्रसन्ना (ग) दुःखिता (घ) जागरूकता

(iv) मलिनाम् **<u>अलीनाम्</u>** स्वनन्तीम् ततिम् पश्य।

(क) पक्षिणाम् (ख) धेनूनाम् (ग) भ्रमराणाम् (घ) शुकानाम्

**ख.अधोलिखितानाम् शब्दानाम् अर्थैः सह मेलनं कुरुत -** 1/2x4=2

चक्षुः. तटिनी

पंकजम् सलिलम्

सरिता नेत्रम्

नीरम् सरोजम्